## नखमुखात् सञ्ज्ञायाम् । (५८/५१४)

[1]नखमुखान्तात् प्रातिपादिकात् सञ्ज्ञायाम् विषये [2]स्त्रियां ङीष् प्रत्ययो न भवति । शूर्पणखा । [3]वज्रणखा । गौरमुखा । [4]कालमुखा । सञ्ज्ञायाम् इति किम् ? [5]ताम्रनखी कन्या । [6]चन्द्रमुखी ॥

## दीर्घजिह्वी च च्छन्दसि । (५९/३४४८)

दीर्घजिह्वी इति छन्दसि विषये निपात्यते । संयोगोपधत्वादप्राप्तो ङीष् [7]विधीयते । 'दीर्घजिह्वी वै देवानां हव्यमवालेट्' (मै. सं. ३.१०.६) । चकारः सञ्ज्ञानुकर्षणार्थः । दीर्घजिह्वी इति निपातनं नित्यार्थम्[8] ॥

## दिक्पूर्वपदान् ङीप् । (६०/५१५)

स्वाङ्गाच्चोपसर्जनात् (४.१.५४/५१०) इत्येवमादिविधिप्रतिषेधविषयः सर्वोऽप्यपेक्ष्यते । यत्र ङीष् विहितस्तत्र तदपवादः । दिक्पूर्वपदात् प्रातिपदिकात् [9]ङीप् प्रत्ययो[10] भवति । स्वरे विशेषः । प्राङ्मुखी, प्राङ्मुखा । प्राङ्नासिकी, प्राङ्नासिका । इह न भवति, प्राग्गुल्फा, प्राक्क्रोडा, प्राग्जघना इति ॥

## वाहः । (६१/५१६)

ङीषेव [11]स्वर्यते, न ङीप् । वहेरयं ण्विप्रत्ययान्तस्य निर्देशः । सामर्थ्यात् [12]तदन्तनिर्देविज्ञानम् । वाहन्तात् प्रातिपदिकात् स्त्रियां ङीष् प्रत्ययो भवति । 'दित्यौही' (तै. सं. ४.७.१०.१) । प्रष्ठौही ॥

## सख्यशिश्वीति भाषायाम् । (६२/५१७)

सखी अशिश्वी इत्येतौ शब्दौ [13]ङीषन्तौ भाषायां निपात्येते । [14]सखीयं मे ब्राह्मणी । नास्याः शिशुरस्ति इति अशिश्वी । भाषायाम् इति किम् ? 'सखा [15]सप्तपदी भव' (आ.गृ. १.७.१९) । [16]अशिशुमिव मामयं शिशुरभिमन्यते ॥

## जातेरस्त्रीविषयादयोपधात् । (६३/५१८)

जातिवाचि यत् प्रातिपदिकं न च स्त्रियामेव नियतमस्त्रीविषयमयकारोपधं च तस्मात् स्त्रियां ङीष् प्रत्ययो भवति ।

आकृतिग्रहणा जातिर्लिङ्गानां च न सर्वभाक् ।
सकृदाख्यातनिर्ग्राह्या गोत्रं च चरणैः सह ॥ (म. भा. २.२२५)

---

1. नखमुखशब्दान्तात् ग. 2. स्त्रियां नास्ति फ. 3. वज्रमुखा इ, उष्ट्रमुखा क. 4. काण्डमुखा फ. 5. ताम्रमुखी ब.इ. 6. नास्ति फ, गौरमुखी कन्या ड, चण्डमुखी इ. 7. एव इत्यधिकम् फ. 8. दीर्घजिह्वा अन्या इत्यधिकम् ब.क.ड. 9. स्त्रियाम् इत्यधिकम् क. ड. फ. 10. वा इत्यधिकम् क. ब. 11. स्मर्यते फ. 12. तदन्तविधिविज्ञानम् ड. 13. ङीष्प्रत्ययान्तौ फ, ङीषन्तौ भाषायां विषये ड. 14. सखी मे फ. ह. 14. सप्तपदा ग.फ. 15. अशिशुरिव क.इ.फ, अशिशुमिव मातरं शरारुरभिमन्यते ड.